श्री ललिता स्तवराजः

श्री ललिता स्तवराजः

देवा ऊचुः |
जय देवि जगन्मातर्जय देवि परात्परे |
जय कल्याणनिलये जय कामकलात्मिके || 1 ||

जयकारि च वामाक्षि जय कामाक्षि सुंदरि |
जयाखिलसुराराध्ये जय कामेशि मानदे || 2 ||

जय ब्रह्ममये देवि ब्रह्मात्मकरसात्मिके |
जय नारायणि परे नंदिताशेषविष्टपे || 3 ||

जय श्रीकंठदयिते जय श्रीललितेंबिके |
जय श्रीविजये देवि विजयश्रीसमृद्धिदे || 4 ||

जातस्य जायमानस्य इष्टापूर्तस्य हेतवे |
नमस्तस्यै त्रिजगतां पालयित्र्यै परात्परे || 5 ||

कलामुहूर्तकाष्ठाहर्मासर्तुशरदात्मने |
नमः सहस्रशीर्षायै सहस्रमुखलोचने || 6 ||

नमः सहस्रहस्ताब्जपादपंकजशोभिते |
अणोरणुतरे देवि महतोऽपि महीयसि || 7 ||

परात्परतरे मातस्तेजस्तेजीयसामपि |
अतलं तु भवेत्पादौ वितलं जानुनी तव || 8 ||

रसातलं कटीदेशः कुक्षिस्ते धरणी भवेत् |
हृदयं तु भुवर्लोकः स्वस्ते मुखमुदाहृतम् || 9 ||

दृशश्चंद्रार्कदहना दिशस्ते बाहवोंबिके |
मरुतस्तु तवोच्छ्वासा वाचस्ते श्रुतयोऽखिलाः || 10 ||

क्रीडा ते लोकरचना सखा ते चिन्मयः शिवः |
आहारस्ते सदानंदो वासस्ते हृदये सताम् || 11 ||

दृश्यादृश्यस्वरूपाणि रूपाणि भुवनानि ते |
शिरोरुहा घनास्ते तु तारकाः कुसुमानि ते || 12 ||

धर्माद्या बाहवस्ते स्युरधर्माद्यायुधानि ते |
यमाश्च नियमाश्चैव करपादरुहास्तथा || 13 ||

स्तनौ स्वाहास्वधाकारौ लोकोज्जीवनकारकौ |
प्राणायामस्तु ते नासा रसना ते सरस्वती || 14 ||

प्रत्याहारस्त्विंद्रियाणि ध्यानं ते धीस्तु सत्तमा |
मनस्ते धारणाशक्तिर्हृदयं ते समाधिकः || 15 ||

महीरुहास्तेऽंगरुहाः प्रभातं वसनं तव |
भूतं भव्यं भविष्यच्च नित्यं च तव विग्रहः || 16 ||

यज्ञरूपा जगद्धात्री विष्वग्रूपा च पावनी |
आदौ या तु दया भूता ससर्ज निखिलाः प्रजाः || 17 ||

हृदयस्थापि लोकानामदृश्या मोहनात्मिका |
नामरूपविभागं च या करोति स्वलीलया || 18 ||

तान्यधिष्ठाय तिष्ठंति तेष्वसक्तार्थकामदा |
नमस्तस्यै महादेव्यै सर्वशक्त्यै नमो नमः || 19 ||

यदाज्ञया प्रवर्तंते वह्निसूर्येंदुमारुताः |
पृथिव्यादीनि भूतानि तस्यै देव्यै नमो नमः || 20 ||

या ससर्जादिधातारं सर्गादावादिभूरिदम् |
दधार स्वयमेवैका तस्यै देव्यै नमो नमः || 21 ||

यथा धृता तु धरणी ययाकाशममेयया |
यस्यामुदेति सविता तस्यै देव्यै नमो नमः || 22 ||

यत्रोदेति जगत्कृत्स्नं यत्र तिष्ठति निर्भरम् |
यत्रांतमेति काले तु तस्यै देव्यै नमो नमः || 23 ||

नमो नमस्ते रजसे भवायै
नमो नमः सात्त्विकसंस्थितायै |
नमो नमस्ते तमसे हरायै
नमो नमो निर्गुणतः शिवायै || 24 ||

नमो नमस्ते जगदेकमात्रे
नमो नमस्ते जगदेकपित्रे |
नमो नमस्तेऽखिलरूपतंत्रे
नमो नमस्तेऽखिलयंत्ररूपे || 25 ||

नमो नमो लोकगुरुप्रधाने
नमो नमस्तेऽखिलवाग्विभूत्यै |
नमोऽस्तु लक्ष्म्यै जगदेकतुष्ट्यै
नमो नमः शांभवि सर्वशक्त्यै || 26 ||

अनादिमध्यांतमपांचभौतिकं
ह्यवाङ्मनोगम्यमतर्क्यवैभवम् |
अरूपमद्वंद्वमदृष्टिगोचरं
प्रभावमग्र्यं कथमंब वर्ण्यते || 27 ||

प्रसीद विश्वेश्वरि विश्ववंदिते
प्रसीद विद्येश्वरि वेदरूपिणि |
प्रसीद मायामयि मंत्रविग्रहे
प्रसीद सर्वेश्वरि सर्वरूपिणि || 28 ||

इति श्रीब्रह्मांडमहापुराणे उत्तरभागे ललितोपाख्याने त्रयोदशोऽध्याये विश्वरूप स्तोत्रं नाम श्री ललिता स्तवराजः ||